CAREERINDIA

**Signature and Name of Invigilator**

1. (Signature) ____________________

   (Name) ____________________

2. (Signature) ____________________

   (Name) ____________________

**OMR Sheet No. :** ..........................................
(To be filled by the Candidate)

**Roll No.** | | | | | | | | |
(In figures as per admission card)

**Roll No.** ____________________
(In words)

**J 2 5 1 5**

# PAPER - III
# SANSKRIT

**Time : 2½ hours]** **[Maximum Marks : 150**

Number of Pages in this Booklet : **12** Number of Questions in this Booklet : **75**

## Instructions for the Candidates

1. Write your roll number in the space provided on the top of this page.
2. This paper consists of seventy five multiple-choice type of questions.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal and do not accept an open booklet.
   (ii) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.**
   (iii) After this verification is over, the Test Booklet Number should be entered on the OMR Sheet and the OMR Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (1), (2), (3) and (4). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** ① ② ● ④ where (3) is the correct response.
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark your response at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done in the end of this booklet.
8. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
9. You have to return the original OMR Sheet to the invigilators at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry original question booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. **Use only Blue/Black Ball point pen.**
11. **Use of any calculator or log table etc., is prohibited.**
12. **There are no negative marks for incorrect answers.**

## परीक्षार्थियों के लिए निर्देश

1. इस पृष्ठ के ऊपर नियत स्थान पर अपना रोल नम्बर लिखिए।
2. इस प्रश्न-पत्र में पचहत्तर बहुविकल्पीय प्रश्न हैं।
3. परीक्षा प्रारम्भ होने पर, प्रश्न-पुस्तिका आपको दे दी जायेगी। पहले पाँच मिनट आपको प्रश्न-पुस्तिका खोलने तथा उसकी निम्नलिखित जाँच के लिए दिये जायेंगे, जिसकी जाँच आपको अवश्य करनी है :
   (i) प्रश्न-पुस्तिका खोलने के लिए पुस्तिका पर लगी कागज की सील को फाड़ लें। खुली हुई या बिना स्टीकर-सील की पुस्तिका स्वीकार न करें।
   (ii) **कवर पृष्ठ पर छपे निर्देशानुसार प्रश्न-पुस्तिका के पृष्ठ तथा प्रश्नों की संख्या को अच्छी तरह चैक कर लें कि ये पूरे हैं। दोषपूर्ण पुस्तिका जिनमें पृष्ठ/प्रश्न कम हों या दुबारा आ गये हों या सीरियल में न हों अर्थात किसी भी प्रकार की त्रुटिपूर्ण पुस्तिका स्वीकार न करें तथा उसी समय उसे लौटाकर उसके स्थान पर दूसरी सही प्रश्न-पुस्तिका ले लें। इसके लिए आपको पाँच मिनट दिये जायेंगे। उसके बाद न तो आपकी प्रश्न-पुस्तिका वापस ली जायेगी और न ही आपको अतिरिक्त समय दिया जायेगा।**
   (iii) इस जाँच के बाद प्रश्न-पुस्तिका का नंबर OMR पत्रक पर अंकित करें और OMR पत्रक का नंबर इस प्रश्न-पुस्तिका पर अंकित कर दें।
4. प्रत्येक प्रश्न के लिए चार उत्तर विकल्प (1), (2), (3) तथा (4) दिये गये हैं। आपको सही उत्तर के वृत्त को पेन से भरकर काला करना है जैसा कि नीचे दिखाया गया है।
   **उदाहरण :** ① ② ● ④ जबकि (3) सही उत्तर है।
5. प्रश्नों के उत्तर **केवल प्रश्न पुस्तिका के अन्दर दिये गये OMR पत्रक पर ही** अंकित करने हैं। यदि आप OMR पत्रक पर दिये गये वृत्त के अलावा किसी अन्य स्थान पर उत्तर चिन्हांकित करते हैं, तो उसका मूल्यांकन नहीं होगा।
6. अन्दर दिये गये निर्देशों को ध्यानपूर्वक पढ़ें।
7. कच्चा काम (Rough Work) इस पुस्तिका के अन्तिम पृष्ठ पर करें।
8. यदि आप OMR पत्रक पर नियत स्थान के अलावा अपना नाम, रोल नम्बर, फोन नम्बर या कोई भी ऐसा चिह्न जिससे आपकी पहचान हो सके, अंकित करते हैं अथवा अभद्र भाषा का प्रयोग करते हैं, या कोई अन्य अनुचित साधन का प्रयोग करते हैं, जैसे कि अंकित किये गये उत्तर को मिटाना या सफेद स्याही से बदलना तो परीक्षा के लिये अयोग्य घोषित किये जा सकते हैं।
9. आपको परीक्षा समाप्त होने पर मूल OMR पत्रक निरीक्षक महोदय को लौटाना आवश्यक है और परीक्षा समाप्ति के बाद उसे अपने साथ परीक्षा भवन से बाहर न लेकर जायें। हालांकि आप परीक्षा समाप्ति पर मूल प्रश्न-पुस्तिका तथा OMR पत्रक की डुप्लीकेट प्रति अपने साथ ले जा सकते हैं।
10. **केवल नीले/काले बाल प्वाईंट पेन का ही इस्तेमाल करें।**
11. **किसी भी प्रकार का संगणक (कैलकुलेटर) या लाग टेबल आदि का प्रयोग वर्जित है।**
12. **गलत उत्तरों के लिए कोई नकारात्मक अंक नहीं हैं।**

www.careerindia.com

CAREERINDIA

# SANSKRIT

# संस्कृत

## PAPER - III

## प्रश्नपत्र – III

**Note :** This paper contains **seventy five (75)** objective type questions of **two (2)** marks each. **All** questions are **compulsory**.

**निर्देश :** इस प्रश्नपत्र में **पचहत्तर (75)** बहु-विकल्पीय प्रश्न हैं। प्रत्येक प्रश्न के **दो (2)** अंक हैं। **सभी** प्रश्न अनिवार्य है।

**1.** 'यस्यामाप: परिचरा: समानी-

रहोरात्रे अप्रमादं क्षरन्ति।'

मन्त्रांशोऽयं केन सूक्तेन सम्बद्ध: ?

(1) अग्निसूक्तेन (2) नासदीयसूक्तेन (3) पृथिवीसूक्तेन (4) हिरण्यगर्भसूक्तेन

**2.** पुरुषसूक्तेन सम्बद्धा उक्ति: अस्ति –

(1) 'राजन्तमध्वराणां गोपामृतस्य दीदिविम्'

(2) 'य: पर्वतान् प्रकुपिताँ अरम्णात्'

(3) 'स: भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्'

(4) 'न मृत्युरासीदमृतं न तर्हि'

**3.** क: अग्निसूक्तस्य ऋषि: ?

(1) मधुच्छन्दा: (2) प्रजापति: (3) हिरण्यगर्भ: (4) विश्वामित्र:

**4.** ब्राह्मणग्रन्थानां प्रतिपाद्यविषयस्य कति प्रकारा: ?

(1) द्वादश (2) षोडश (3) चत्वार: (4) दश

**5.** ''आरण्यकञ्च वेदेभ्य: औषधिभ्योऽमृतं यथा।'' इति उक्तम् –

(1) सायणेन (2) कृष्णद्वैपायनेन (3) यास्केन (4) मनुना

www.careerindia.com

CAREERINDIA

6. 'त्रयः स्वराः' इत्यन्तर्गते न गण्यते –

(1) उदात्तः (2) आगमः (3) स्वरितः (4) अनुदातः

7. प्रायः वेदेषु एव लभ्यते –

(1) लट्लकारः (2) लृट्लकारः (3) लिट्लकारः (4) लेट्लकारः

8. अस्ति बाह्यप्रयत्नः –

(1) नादः (2) ईषत्स्पृष्टम् (3) स्पृष्टम् (4) विवृतम्

9. ''तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्नर्यम'' इत्यनेन लक्षितम् –

(1) कल्पः (2) छन्दस् (3) निरुक्तम् (4) ज्योतिष्

10. द्वात्रिंशत् अक्षराणि भवन्ति –

(1) बृहतीच्छन्दसि (2) पंक्तिच्छन्दसि (3) जगतीच्छन्दसि (4) अनुष्टुप्

11. पादपूरणार्थकः निपातः अस्ति –

(1) इत् (2) च (3) ननु (4) इव

12. 'व्यञ्जनसन्निपातः' इति कथ्यते –

(1) प्रगृह्यः (2) अघोषः (3) संयोगः (4) यमः

13. यक्षरूपधारिणः परब्रह्मणः आख्यायिका उपलभ्यते –

(1) ईशावास्योपनिषदि (2) केनोपनिषदि (3) कठोपनिषदि (4) तैत्तिरीयोपनिषदि

14. ''मन एव त्वच्छ्रेयो मनसो वै त्वं ..........'' इति उक्तम् –

(1) मनसा (2) वाचा (3) नचिकेतसा (4) प्रजापतिना

15. 'यद् दूरङ्गता भवति' इति निरुक्त्या किम् उपलक्ष्यते ?

(1) गौः (2) समुद्रः (3) नदी (4) मेघः

www.careerindia.com

16. 'अथ शीक्षां व्याख्यास्याम:' इत्युक्ति: कुत: उद्धृता –

(1) कठोपनिषद: (2) तैत्तिरीयोपनिषद: (3) पाणिनीयशिक्षात: (4) याज्ञवल्क्यशिक्षात:

17. अधोलिखितेषु नित्यकर्म भवति –

(1) ज्योतिष्टोमादि (2) सन्ध्यावन्दनादि (3) चान्द्रायणादि (4) जातेष्टयादि

18. अजहल्लक्षणाया उदाहरणं भवति –

(1) शोणो धावति (2) तत् त्वमसि (3) गङ्गायां घोष: (4) सोऽयं देवदत्त:

19. अधोलिखितेषु साक्षात्कारोपयोगि भवति –

(1) उपक्रम: (2) अपूर्वता (3) निदिध्यासनम् (4) फलम्

20. अधस्तनेषु साधनचतुष्टये अन्तर्भवति –

(1) शमदमादिषट्कसम्पत्ति: (2) चन्दनम्

(3) उपक्रम: (4) उपसंहार:

21. वेद: क: ?

(1) अपौरूषेयं वाक्यम् (2) अङ्ग-प्रधान-सम्बन्ध-बोधकं वाक्यम्

(3) कर्मबोधकं वाक्यम् (4) समभिव्याहार: वाक्यम्

22. प्रयोगविधे: सहकारिप्रमाणानि –

(1) पञ्च (2) षट् (3) सप्त (4) चत्वारि

23. 'तत्र चान्यत्र च प्राप्तौ' इति कस्य लक्षणं भवति ?

(1) अपूर्वविधे: (2) नियमविधे: (3) अधिकारविधे: (4) परिसङ्ख्याया:

24. 'विरोधे गुणवाद: स्यात्' इति लक्षणम् –

(1) नामधेयस्य (2) गुणविधे: (3) अर्थवादस्य (4) मन्त्रस्य



www.careerindia.com

CAREERINDIA

**25.** समीचीनतालिकां चिनुत –

| | | | |
|---|---|---|---|
| (a) | घटः पटः न | (i) | प्रागभावः |
| (b) | इह घटो भविष्यति | (ii) | अन्योन्याभावः |
| (c) | भूतले घटः न | (iii) | प्रध्वंसः |
| (d) | घटो ध्वस्तः | (iv) | अत्यन्ताभावः |

| | **(a)** | **(b)** | **(c)** | **(d)** |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iii) | (iv) |
| (2) | (iv) | (iii) | (ii) | (i) |
| (3) | (iii) | (ii) | (i) | (iv) |
| (4) | (ii) | (i) | (iv) | (iii) |

**26.** अभावस्य प्रत्यक्षं भवति –

(1) संयोगसम्बन्धेन (2) समवायसम्बन्धेन

(3) संयुक्त-समवाय-सन्निकर्षेण (4) विशेषण-विशेष्य-भावसन्निकर्षेण

**27.** 'आप्तवाक्यं शब्दः' इति लक्षणम् –

(1) पदस्य (2) वाक्यस्य (3) शब्दप्रमाणस्य (4) महावाक्यस्य

**28.** 'एकास्मिन् धर्मिणि नानाधर्मावगाहि ज्ञानम्' इति लक्षणं भवति –

(1) अज्ञानस्य (2) समूहालम्बनज्ञानस्य (3) संशयस्य (4) शाब्दज्ञानस्य

**29.** 'प्रतिविषयाध्यवसायः' इत्यस्य सम्बन्धः केन ?

(1) अनुमानेन (2) आप्तवचनेन (3) प्रत्यक्षेण (4) उपमानेन

**30.** 'प्रदीपवच्चार्थतो वृत्तिः' कस्य ?

(1) प्रकृतेः (2) गुणत्रयस्य (3) जलस्य (4) तेजसः

**31.** 'ततोऽहङ्कारः' इति अहङ्कारस्य उत्पत्तिः कुतः भवति ?

(1) प्रकृतेः (2) महतः (3) षोडशगणात् (4) पञ्चभूतेभ्यः

www.careerindia.com

CAREERINDIA

32. साङ्ख्यदर्शनानुसारं अध्यवसायात्मकं तत्त्वं किम् ?

(1) बुद्धिः (2) चक्षुः (3) त्वक् (4) कर्णः

33. 'स वाग्वज्रो यजमानं हिनस्ति' इत्यनेन महाभाष्ये किमभिप्रेतम् ?

(1) शब्दशुद्धिः (2) चित्तशुद्धिः (3) कायशुद्धिः (4) व्यवहारशुद्धिः

34. 'यागात् स्वर्गो भवति' इत्यत्र भू-धातोः कः अर्थः ?

(1) सत्ता (2) यागः (3) स्वर्गः (4) उत्पत्तिः

35. अधोऽङ्कितानां युग्मानां समीचीना तालिका चेतव्या –

| | | | |
|---|---|---|---|
| (a) | झयः | (i) | भृत्यः |
| (b) | मनोरौवा | (ii) | शताद् बद्धः |
| (c) | भृञोऽसंज्ञायाम | (iii) | विद्युत्वान् |
| (d) | अकर्तर्यृणे पञ्चमी | (iv) | मनुः |

| | **(a)** | **(b)** | **(c)** | **(d)** |
|---|---|---|---|---|
| (1) | (ii) | (iv) | (iii) | (i) |
| (2) | (iii) | (iv) | (i) | (ii) |
| (3) | (i) | (iii) | (ii) | (iv) |
| (4) | (iii) | (iv) | (ii) | (i) |

36. 'सर्पिषो जानीते' इत्यत्र क्रियापदे आत्मनेपदविधायकं सूत्रं किम् ?

(1) तङाऽऽनावाऽऽत्मनेपदम् (2) कर्तरि कर्मव्यतिहारे

(3) अनुदात्तङित आत्मनेपदम् (4) अकर्मकाच्च

37. 'उपरमति' इत्यत्र परस्मैपदविधायकं सूत्रं किम् ?

(1) व्याङ्परिभ्यो रमः (2) अभिप्रत्यतिभ्यः क्षिपः

(3) अनुपराभ्यां कृञः (4) उपाच्च

www.careerindia.com

CAREERINDIA

38. ध्वनिस्फोटयोर्मध्ये कः सम्बन्धः ?

(1) कार्यकारणभावः (2) शक्तिशक्तिमद्भावः

(3) गुणगुणिभावः (4) क्रियाक्रियावद्भावः

39. स्वीकृतं भर्तृहरिमते वाचः –

(1) चातुर्विध्यम् (2) त्रैविध्यम् (3) द्वैविध्यम् (4) ऐकविध्यम्

40. तृतीये सवने कीदृशः स्वरः प्रयोज्यः ?

(1) गम्भीरः (2) मध्यमः (3) तारः (4) कम्पः

41. 'वज्रं पतति मस्तके' इति पद्यांशः कुत्रोक्तः ?

(1) महाभाष्ये (2) अष्टाध्याय्याम् (3) वाक्यपदीये (4) पाणिनिशिक्षायाम्

42. प्रसिद्धध्वनिनियमेषु अर्वाचीनतमः कः ?

(1) वर्नरनियमः (2) ग्रासमाननियमः (3) ग्रिमनियमः (4) विष्टरनिट्जनियमः

43. जिह्वाभागविशेषोच्चारणदृष्ट्या मध्यस्वरोऽस्ति –

(1) अकारः (2) इकारः (3) उकारः (4) एकारः

44. आकृतिमूलकवर्गीकरणेन असम्बद्धम् –

(1) प्रकृतिः (2) प्रत्ययः (3) उपसर्गः (4) व्यापारः

45. पारिवारिकवर्गीकरणेन असम्बद्धम् –

(1) फलसाम्यम् (2) ध्वनिसाम्यम् (3) पदसाम्यम् (4) अर्थसाम्यम्

46. संस्कृतभाषायाः 'शतम्' इति पदं गॉथिकभाषायाम् 'हुन्द' भवति; इति कस्य मतम् ?

(1) ग्रिममहोदयस्य (2) वर्नरमहोदयस्य (3) ग्रासमानमहोदयस्य (4) थॉम्पसनमहोदयस्य

www.careerindia.com

CAREERINDIA

**47.** अर्थपरिवर्तनकारणेष्वन्यतमम् –

(1) सादृश्यम् (2) आगमः (3) लोपः (4) स्वरभक्तिः

**48.** ''हृतेऽपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः।''; कस्य वर्णना इयम्?

(1) कुबेरस्य (2) यमवाहनमहिषस्य (3) इन्द्रस्य (4) वरुणस्य

**49.** ''मदेकपुत्रा जननी जरातुरा ..........'' कस्येयमुक्तिः?

(1) दमयन्त्याः (2) हंसस्य (3) भीमस्य (4) नलस्य

**50.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

| | | | |
|---|---|---|---|
| (a) | चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः। | (i) | मृच्छकटिकम् |
| (b) | आसीत् स दोलाचलचित्तवृत्तिः। | (ii) | कर्णभारम् |
| (c) | हृदये गृह्यते नारी यदीदं नास्ति गम्यताम्। | (iii) | रघुवंशम् |
| (d) | हुतं च दत्तं च तथैव तिष्ठति। | (iv) | मुद्राराक्षसम् |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (iv) | (i) | (ii) | (iii) |
| (2) | (iii) | (ii) | (i) | (iv) |
| (3) | (ii) | (iii) | (iv) | (i) |
| (4) | (iv) | (iii) | (i) | (ii) |

**51.** ''न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।'' केन छन्दसा विनिर्मितोऽयं श्लोकः?

(1) मन्दाक्रान्ता (2) हरिणी (3) शिखरिणी (4) स्रग्धरा

**52.** ''वैदेहिबन्धोर्हृदयं विददे –'' इत्यत्र कस्तावत् वैदेहिबन्धुः?

(1) रामः (2) लक्ष्मणः (3) रावणः (4) भरतः

**53.** रत्नावल्यां उदयनस्य कञ्चुकी कः?

(1) बाभ्रव्यः (2) यौगन्धरायणः (3) वसन्तकः (4) विक्रमबाहुः

www.careerindia.com

CAREERINDIA

54. कुरङ्गकेन हर्षचरिते किं कर्म कृतम् ?

(1) चिकित्साकर्म (2) पूजाकर्म (3) वार्ताप्रदानम् (4) भाग्यगणनम्

55. ''सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रय:।'' इत्यादि - श्लोक: कस्य उदाहरणरूपेण ध्वन्यालोके उल्लिखित: ?

(1) अक्षेपालङ्कारस्य (2) विशेषोक्त्यलङ्कारस्य

(3) अविवक्षितवाच्यस्य (4) विवक्षितान्यपरवाच्यस्य

56. ''नृत्तं __________।'' शून्यं स्थानं पूरयत।

(1) भावाश्रयम् (2) केवलं लयाश्रयम् (3) केवलं तालाश्रयम् (4) काललयाश्रयम्

57. प्राप्त्याशा भवति -

(1) फललाभाय औत्सुक्यमात्रम्। (2) उपायापायशङ्काभ्यां प्राप्तिसंभव:।

(3) अप्राप्तौ अतित्वरान्वित: व्यापार:। (4) अपायाभावत: प्राप्ति:।

58. ''नि: शेषच्युतचन्दनं ..........'' इत्यादि-श्लोके 'अत्र तदन्तिकमेव रन्तुं गतासि' इति व्यङ्ग्यं मम्मटेन कथं निर्धारितम् ?

(1) प्राधान्येन 'अधम' पदेन। (2) प्राधान्येन 'मिथ्यावादिनि' पदेन।

(3) 'नि:शेष' शब्देन। (4) 'निर्मृष्टरागोऽधर:' इति पदेन।

59. ''किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्प्यते।

तादृगन्यव्यपोहाय __________ तु सा स्मृता।।''

रिक्तस्थानं पूरयत।

(1) उपमा (2) व्याजस्तुति: (3) अपह्नुति: (4) परिसंख्या

60. दशरूपकमते नाटकस्य अङ्कसंख्या भवति -

(1) 5 - 7 (2) 5 - 8 (3) 5 - 10 (4) 7 - 10

CAREERINDIA

**61.** रिक्तं स्थानं पूरयत –

''नाट्याख्यं __________ वेदं सेतिहासं करोम्यहम्।''

(1) उत्तमम् (2) अपूर्वम् (3) द्वितीयम् (4) पञ्चमम्

**62.** ''सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।'' –

काव्यप्रकाशकारमते कोऽयम् अलङ्कारः ?

(1) निदर्शना (2) प्रतिवस्तूपमा (3) दृष्टान्तः (4) विशेषोक्तिः

**63.** ''स तप्तकार्त्तस्वरभास्वराम्बरः ..........'' इति शिशुपालवधस्य श्लोकांशे 'कार्त्तस्वर' – पदस्य कोऽर्थः ?

(1) रजतम् (2) ताम्रम् (3) सुवर्णम् (4) स्फटिकम्

**64.** कस्य काव्यं 'विद्वदौषधं' कथ्यते ?

(1) माघस्य (2) श्रीहर्षस्य (3) कालिदासस्य (4) अश्वघोषस्य

**65.** ''सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।''

इत्याद्युक्तिः केन सम्बद्धा ?

(1) वेदलक्षणेन (2) ज्योतिषलक्षणेन (3) महाकाव्यलक्षणेन (4) पुराणलक्षणेन

**66.** एषु कस्य देशस्य नाम हरिषेणस्य एलाहाबाद–शिलालेखे नास्ति ?

(1) समतटः (2) डवाकः (3) कामरूपः (4) चीनः

**67.** अर्थशास्त्रकारमते विद्या कतिविधा ?

(1) द्विविधा (2) त्रिविधा (3) चतुर्विधा (4) पञ्चविधा

**68.** अर्थशास्त्रतः रिक्तं स्थानं पूरयत –

''कृषिपशुपाल्ये वणिज्या च __________।''

(1) वार्त्ता (2) आन्वीक्षिकी (3) त्रयी (4) दण्डनीतिः

www.careerindia.com

CAREERINDIA

69. यस्य कथा रामायणाश्रिता नास्ति –

(1) रघुवंशस्य (2) भट्टिकाव्यस्य (3) जानकीहरणस्य (4) किरातार्जुनीयस्य

70. 'जय' इति कस्य महाकाव्यस्य नामान्तरम् ?

(1) रामायणस्य (2) महाभारतस्य (3) रघुवंशस्य (4) शिशुपालवधस्य

71. मनुसंहितायां कस्य दुर्गस्य समाश्रयणं बहुधा प्रशंसितम् ?

(1) धन्वदुर्गस्य (2) अब्दुर्गस्य (3) महीदुर्गस्य (4) गिरिदुर्गस्य

72. मनुसंहितायां कति क्रोधजानि व्यसनानि ?

(1) अष्टौ (2) नव (3) दश (4) सप्त

73. "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः।" – इति मनुसंहितायां कस्मिन्नध्याये उपलभ्यते ?

(1) प्रथमाध्याये (2) द्वितीयाध्याये (3) तृतीयाध्याये (4) सप्तमाध्याये

74. अभियोगे साक्ष्ये च दोषत्वेन न गण्यते –

(1) धनविकृतिः (2) कर्मविकृतिः (3) मनोविकृतिः (4) वाग्विकृतिः

75. साक्षिगुणान्यतमो नास्ति –

(1) तपस्विता (2) सत्यवादिता (3) कूटसाक्षिता (4) धनान्विता

- o 0 o -

www.careerindia.com

CAREERINDIA

**Space For Rough Work**

www.careerindia.com